# उपसंहारः

संस्कृतभाषायां प्रतिशास्त्रस्य विषये एतादृशीपरम्परा वर्तते यत् सर्वं वेदात् प्रसिध्यति, सर्वः वेदमयो हि सः इत्यादि उक्तयोः ज्ञायतेयत् यत्किमापे शास्त्रम् तत् प्रादुर्भावः ब्रह्मणः सूर्यात् इद्राच्च वा अभूत। तदेवाधारिकृत्य सर्वे ऋषिमहर्षिभिः स्व स्व प्रज्ञानुसारेण तत् तत शास्त्राणां विकाशः कृतः। यथा व्याकरणं – धर्मशास्त्रम्– ज्योतिषं इत्यादिनि। शास्त्रेषु मध्ये कनि चित् शास्त्राणि एवं विधानि सन्ति यत् संसारे व्यवहारे चे साक्षात्रूपेण उपयोगि भवन्ति। तेष्वऽपि ज्योतिषं अतीव उपयोगिशास्त्रम् वर्तते। सम्प्रति शास्त्रस्यास्य वहुविध प्रचारं प्रशाराश्र्च भवति एवं संचित्यैव मया सूर्यादुद्घाटितः ज्ञानभास्करः नमकः हस्तलिखित ग्रन्थः अनुसन्धानाय स्वीकृता। अस्यनाम्नः नैकाहस्तप्रतयः प्राप्ताः। अपितु पञ्चसप्तवा पाण्डुलिप्यः प्राप्यन्ते। सर्वाः विविधेषु पुस्तकालयेषु सम्प्रति आसन्। सर्वाः आहत्य स्वीकृत्य संदृष्य च मनसी निधाय एतेषु ग्रन्थेषु यानि प्रकरणानि अत्युप्युक्तानि सन्ति तान्मेव अनुसन्धानकार्यार्थं स्वीकृतम् इति। अनेन कारणेन श्लोकवद्धप्रतयः स्वीकृत्य एषु प्रकरणत्रयम् शोधकार्ये उपयुक्तम् संधार्य कार्यमत्र जातम्

ज्ञानभास्करोक्तस्य प्रकरणत्रयस्य समीक्षात्मकममध्ययनम् इति शीर्षकम् अवलम्बय शोधग्रन्थेऽस्मिन् विवेचनम् व्याख्यानं च प्रस्तूतम्।

प्रथमे हि कस्यशास्त्रस्य गन्थोऽयं एतद् विविच्य ज्योतिषशास्त्रस्य सामान्य परिचयः तद् उपयोगिता तस्य वैविद्यम् च निरूपणम् आवश्यकम् आसीत्। ततः अस्य ऐतिहासिकत्वम् किम् इति विचार्य तदाचार्याः ग्रन्थाः सौर सिद्धान्तस्य ऐतिहासिकता च लिखितम्। ततः ज्योतिष शास्त्रास्य कानि प्रमूख तत्वानि सन्ति यानि विवेचनम् आवश्यकम् आसीत् तदपि विविहतमत्र। अग्रे प्रकरण त्रयस्य परिचयः एतानि प्रकरणानि ज्ञानभास्कर ग्रन्थस्य सन्ति अनेन तदग्रन्थकर्ता विषयश्र्च समावेशः अपि अत्रकृतः। प्रकरण त्रयस्य सामान्य निरूपणम् यथा ज्योतिषे वर्ग निरूपणम् तत्र षड्वर्गस्य वैशिष्ठ्यम् एवं मेषादि द्वादशलग्नानां निरूपणमपि विहितम्। प्रकरणत्रये कानि फलानि सन्ति षड्वर्गफलं किंम ? होराशास्त्रे कर्मविपाकादि फलम् किम् ? संचितं कर्मफलं किम् चेत्यादिनां व्याख्यासहितं अत्र

संग्रथितम्। एतेषां प्रकरणानां साधने किं वैशिष्ठयम् विविधाचार्या मतेषु च द्वादशलग्नानां किं फलं इत्यस्य आवश्यकम् अनिवार्यरूपेण प्रकटितम्।

पर्यन्ते च उक्तप्रकरणत्रयस्य ज्योतिष ग्रन्थेषु कानि वैशिष्ट्यानि अस्य ज्योतिषे का उपयोगिता उक्त प्रकरणानां किं अवदानम् ज्योतिष जगति इत्यपि अत्र सप्रमाणेन विवेचतिम् इति।

शोध प्रबन्धेऽस्मिन् ज्ञानभास्करोक्तस्य प्रकरणत्रयस्य मौलिकरूपेण यथावत् श्लोका: टंकिता: यत्रकुत्राऽपि छन्दनीयमान् नैवदृष्ट: ग्रन्थकारेण तथाऽपि संगत्याधारेण व्याकरण दृष्ट्याच संशुद्धइति कृतेति। सरल संस्कृ त भाषया व्याख्याऽपि उद्धृतेति।

अतएव प्रकरणत्रयस्य ज्योतिषे छात्राणां अधृतिणांच कृते सौकर्यार्थं निर्दिष्ट पदेनाधारिकृत्य कृतमिति